मः अः पूर्णामृतायै नमः इति ॐ षोडश
कलात्मने सोममंडलाय नमः इति संपू

न्म पूर्ववन्मंत्रं दक्षे विलिख्य त्रिकोण
त्रिरेखायां श्रं १८ कं १८ घं १८ इतित्रि
पंक्त्या विलिख्य मूलत्र्यंडचयेण त्रिको
णं षट्कोणे षडंगं च संपूज्य गंगेसा
दितीर्थमावाह्य आनन्दभैरवसवरादे
वौ स्वस्वमंत्रेण संपूज्य पूर्वादितः ग्लूं
गगनरत्नेभ्यो नमः स्लूं स्वर्गरत्नेभ्यो
नमः म्लूं पातालरत्नेभ्यो नमः म्लूं म
र्त्यरत्नेभ्यो नमः मध्ये न्लूं नागरत्नेभ्यो
नमः इति संपूज्य द्वितीयादि संशोध्य
ऽमितस्वर्गरत्नामृतीकृत्य तालत्रये
ण दिशः संबध्य मद्यपरिक्रमया मूल
मंत्रेण नवदेवीमावाह्य तालत्रयेण दिग्ब
न्धं विधाय स्वर्गरत्नामृतीकृत्य योनिं

गो
३·

षट्सर्पे स्हौः नमः इति संपूज्य शंख
मुद्रां षट्कर्म्मे षडङ्गेन सकलीकृत्य म
त्स्यमुद्रयापात्रमाच्छाद्य मूलेनशापा
नसत्रा पात्रे देवी विभावयेदिति ततो
देव्याज्ञामादाय घटसमीपे गुरुपात्रे
ततः शक्तिपात्रे भोगपात्रे स्वपात्रे यो
गिनीपात्रे वीरपात्रे बलिपात्राच्छा
चमनीयपात्राणि संस्थाप्य तर्प्पण
पूतकारणेन तत्त्वमुद्रया श्रीपादात्
समुद्धृत्य आनन्दभैरवं तर्पयामि नम :
इति त्रिर्नमेवेणाचिः सन्तर्प्य ततः श्री
गुरुं श्रीमच्छ्रीकोलानन्दनाथश्रीपा
दुकां तर्पयामि नमः इति त्रिः सन्तर्प्य
एवं परमगुरुपरमाचार्यदीक्षितर्प्प
श्रीपादाम्बतेन मूलेन श्रीत्रिपुरभैरवी

सायुधां सवाहनां सपरिकरां तर्पयामि
नमः इति सन्तर्प्य येदिति कलशपूजा
विधिः अथ श्रीचक्रपीठोपरि संस्थाप्य
पूर्ववत्पीठपूजां विधाय श्रीत्रिपुरभै
रवीं ध्यात्वा वायुबीजेन वामनासापुटे
न देवीं स्वहृदयात्कुसुमाञ्जलिमानीय
तत्रावाह्य ॐ देवेशि भक्तिसुलभे परि
वारसमन्विते यावत्त्वां पूजयिष्यामि
तावद्देवि इहावह इति पठित्वा मूलान्ते
श्रीकामेश्वरशिवसहिते श्रीत्रिपुरभैर
वि इहागच्छ २ इह तिष्ठ २ इह सन्निधे
हि २ इह सन्निरुध्यस्व २ मम सर्वोपचा
रसहितां पूजां गृहाण २ इत्यावाहनादि
मुद्राः सन्दर्श्य श्रीचक्रोपरि प्राणप्रति

गं ह्रां लेलिह्यानमुद्रया विधाय दशादिग्बंधं
३१ कृत्वावगुंठ्य सकलीकृत्य परमीकृत्य
धेनुयोनी प्रदर्श्य वराभयपुस्तकाक्षमा
लात्तांकुशपाशचापबाणकपाल
कमलादिमुद्राः प्रदर्श्य श्रीपाद्यास्ते
न सायुधो सवाहनो सपरिकरो सा·
वरणो श्रीकामेश्वरभैरवसहितो श्री·
त्रिपुरभैरवीं तर्पयामि नमः इति त्रि
संतर्प्य पुनरपि मूलेन श्रीत्रिपुरभैर
वीं श्रीपादुकां तर्पयामि नमः इति त्रिः
संतर्प्य मूलमुच्चार्य एतत्पाद्यं श्रीका
मेश्वरसहितायै श्रीत्रिपुरभैरव्यै नमः
पादयोः पाद्यं एवमर्घ्यं स्वाहा शिरसि
आचमनीयं मधुपर्कं च स्वधा मुखे ॥

स्नानीयं नमः सर्वांगे इतिस्नात्वाप
शुद्धदुकूलेनांगंशोसवि विचित्रपट्टवस्त्र
कुंकुमकस्तूरीचन्दनसिन्दूरमुकुटकुंड
लहारग्रैवेयादिनानालंकारान्दत्वा पुन
राचमनीयंदद्यात् ततो मध्यानामाग्
घ्रैर्गंधेभ्योनमः इतिगंधं श्वेतरक्तनैनी
भांशुष्पाणिवैविधरीतिशुभैःसम्पूज्य
धूपपात्रंफडितिसंपूज्यधरतस्थापयि
त्वावामतर्जन्यासंस्पृशन् श्रीपादाग्र
तेनधूपंनिवेदयामीतिनिवेद्य ओंजग
द्धुनिमंत्रमातःस्वाहेतिघंटांसम्पूज्यवा
मेनपाणिनर्तांवादयन् मध्यनामा
ग्रैष्ठधूपंधृत्वागायत्रीमूलमंत्रंचपठन्
वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्त

मः स्वाहेयः सर्वदेवानां श्रपोयं प्रतिगृ
ह्यतामिति त्रियोतुल्यदेवी श्रपयेत् त
तो दीपं संप्रतिसंस्थाप्य पूर्ववन्मूलमा
मन्त्रेण कृत्वा वाममध्यमयादीपपात्रं
स्पृशन् दीपं निवेदयामीति निवेद्य
पूर्ववद्धुंठं वादयन् मध्यानामांगुष्ठेन
मध्ये दीपपात्रं दृष्ट्वा दर्शयन् गायत्री
मूलं च पठन् स्वप्रकाशो महादीपः स
र्वतस्तिमिरापहः सबाह्याभ्यंतरं ज्योति
दीपोयं प्रतिगृह्यतां इति दीपयेद्दे
वी ततः स्वर्णादिपात्रे ॐ मनवत्स
पत्रे चंद्रनूपंचरत्नं कृत्वा मध्ये दीपमेक
मष्टपत्रेषु दीपाष्टकं संस्थाप्य श्रीं सौः
हूं स्तुं स्तुं स्तुं हूं सौः श्री रत्नेश्वर्यै नमः
इत्येव मूलेन वा भक्ष्य स्थालके

+मा

मल्लकांतमनुहुम नववारं मूलान्ते स
मस्तचक्रचक्रेशीयुते देविनवात्मिके
श्राशिकमिदं देवि गृहाण मम सिद्ध
ये इति चक्रमुद्रया नीराजयेत् ततो
नानानैवेद्यं सुवर्णादिपात्रे निक्षिप्य
मिन्नवशेषं धेनुमुद्रयामृतीकृत्य सव्ये
लेसमथाजमावामांगुष्ठेन नैवेद्यपात्रं
स्पृशन् मूलान्ते हेमपात्रगतं दिव्यं पर
मान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृ
हाण परमेश्वरि नैवेद्यं निवेदयामीति
दत्वा नामांगुष्ठाभ्यां ग्रासमुद्रयेत् ततः शु
द्धाचमनीयं दत्वा मूलान्ते कर्पूरादि
युक्तताम्बूलं निवेदयामीति एवं हृदयान्त
सर्वेषामर्घ्यपात्रजलेनोत्सर्गः कार्यः

ऐं
११

37

ततस्तत्वमुद्रयाहेवीत्रिः सन्तर्प्य पू
र्वोक्तमुद्राः सदर्पं योनिमुद्रां हृदि
क्षोभिणीं मुखे द्राविणीं भ्रूमध्ये आ
कर्षिणीं ललाटे वशिनीं ब्रह्मरंध्रे आ
ह्लादिनीं पंचमुद्रामयीं सदर्पं कृता
ञ्जलिः श्रीत्रिपुरभैरवि देवि शिरसा चर
णां ते पूजयामीत्याज्ञां गृहीत्वा चर
णपूजामारभेत तत्रादौ आग्येयानि
मध्ययोन्योरन्तराले गुरुमन्त्रान्ते श्री
मच्छ्री कोलानन्दनाथ श्रीपादुकां
पूजयामि नमः तर्पयामि नमः परम
गुरुश्री परमाचार्यश्री परमेष्ठिगुरु
दिव्यौघश्री सिद्धौघश्री मानवौघश्री
पुनः गुरुश्री इति पूजयेत्तर्पयेच्च ॥

ततश्चाग्नेये हृदयश्री ईशाने शिरश्री
नैरृते शिखाश्री वायव्ये कवचश्री म
ध्ये नेत्रत्रयश्री दिक्षु च ततथा अस्त्रश्री
इति षडङ्गपरिपूजयेत्तर्पयेच्च ततः त्रिकोणे आ
ग्नेये रंरतिश्री ईशाने प्रींप्रीतिश्री
अग्रकोणे क्लींमनोभवश्री इतिपूज
येत्तर्पयेच्च ततस्त्रिकोणस्यैवान्तरे
द्रांद्रावणबाणश्री द्रींद्रावणबाण
श्रीतदृते क्लींआकर्षणबाणश्री ब्लूं
वशीकरणबाणश्री तदग्रेसः उन्
मादबाणश्रीइति संपूज्यसन्तर्प्य त
थैवतदन्तरे सौः कामश्री क्लींमन्म
थश्री तदृते ऐंकन्दर्पश्री ब्लूंमक
रध्वजश्री अग्रे स्त्रीमीनकेतनश्री इति

त्रि॰ पूजयेत्तर्पयेच्च ततोष्टयोनिषु पूर्वा
२५ दितः अनंगकुसुमाश्री अनंगमेख
लाश्री अनंगमदनाश्री अनंगमदना
तुराश्री सुभगाश्री भगाश्री भगस
र्पिणीश्री भगमालाश्री इति पूजयेत्त
र्पयेच्च ततोष्टपत्रेषु पूर्वादितः अं असि
तांगभैरवश्री आं ब्रह्माणीश्री १ इं रुरुभै
रवश्री ईं माहेश्वरीश्री २ उं चंडभैरवश्री
ऊं कौमारीश्री ३ ऋं क्रोधभैरवश्री ॠं वै
ष्णवीश्री ४ लृं उन्मत्तभैरवश्री लॄं वाराही
श्री ५ एं कपालिभैरवश्री ऐं माहेन्द्री
श्री ६ ओं भीषणभैरवश्री औं चामुं
डाभैरवश्री ७ अं संहारभैरवश्री
॥

श्रः नारसिंहीश्री इति पूजयेत्तर्पयेच्च
ततो ग्रन्थिस्थाने पूर्वादि पश्चिमादितः काम
रूपपीठश्री कोलगिरिपीठश्री क
लान्तकपीठश्री कोल्हारपीठश्री जा
लन्धरपीठश्री उड्डियानपीठश्री दे
वकूटपीठश्री इति पूजयेत्तर्पयेच्च त-
तो हृत्मंडलपश्चिमादितः ॐ ऐं श्रीं
श्रीं हेरुकभैरवश्री वेतालभैरवश्री
त्रिपुरान्तकभैरवश्री अग्निजिह्वभैर
वश्री कालान्तकभैरवश्री कपालि
भैरवश्री एकपादभैरवश्री भीमरू
पभैरवश्री मलयभैरवश्री हाटकेश्व
रभैरवश्री इति पूजयेत्तर्पयेच्च ततश्च
तुरग्रे पूर्वादितः इन्द्रश्री अग्निश्री यम

त्रि· श्री निऋतिश्री वरुणश्री वायुश्री
३५ ईशानश्री इन्द्रेशानयोर्मध्ये ब्रह्मश्री
वरुणानन्तयोर्मध्ये विष्णुश्री इति
पूजयेत्तर्पयेच्च ततस्तेषामेव समीपे
वज्रश्री शक्तिश्री दण्डश्री खड्गश्री
पाशश्री ध्वजश्री गदाश्री त्रिशूल
श्री पद्मश्री चक्रश्री इति पूजयेत्तर्प
येच्च ततस्तदग्रे पश्चिमे वटुक
श्री उत्तरे योगिनीश्री पूर्वे क्षे
त्रपालश्री दक्षिणे गणपतिश्री
इति पूजयेत्तर्पयेच्च वायव्ये वस्त्रश्री
ईशाने द्वादशादित्याश्री आग्नेये ए
कादशरुद्रश्री नैरृते सर्वभूतश्री इ
ति पूजयेत्तर्पयेच्च ॥

35

इत्यावरणं संपूज्य पुनरपि विन्दौ पूर्व
वन्मूलदेवीं सम्पूज्य सन्तर्प्य गन्धः धूप
दीपं पुष्पाञ्जलि नैवेद्याणि सम्पूज्य नि·
त्यहोममाचरेद्यथा अग्नौ जले वा चरुं
विलिख्य विभाव्य वा प्राणाय स्वाहा
अपानाय व्यानाय उदानाय समा
नाय इति हुत्वा षडङ्गाहुतीः कुर्यात्
ततो मूलेन यथाशक्ति स्वदेव्या आहु
तीर्हुत्वा स्वहृदि विसृज्य ततः मण्डल
कृत्वा वं वटुकाय नमः पश्चाद्देवीपु
रः वटुकनाथ कपिलजटाभारभास्वर
त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय २
सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा
इति वटुकबलिः आग्नेय्यां योगिनी

त्रिकोणं च [illegible]
कृत्वा

गायत्रीमंत्र
[illegible]

ईशाने

त्रि ओं नमः ऊर्ध्वब्रह्माइति यांयोगिनी
३५ भ्यः स्वाहा सर्वयोगिनीहूंफट् स्वाहा
इतियोगिनीवलिः नैरृते क्षांक्षींक्षूं
क्षैंक्षौंक्षः क्षेत्रपालप्रतिवलिः सहितं
वलिंगृह्ण २ स्वाहा इतिक्षेत्रपालव
लिः वायव्ये गांगींगूंगणपतयेवर
वरदसर्वजनंमेवशमानयवलिंगृह्ण २
स्वाहा इतिगणपतिवलिः इतिव
लिंकृत्वा काकादिवलिमपिकृत्वा
गुरुदैवं ध्यायन्यथाशक्तिजपंविधा
य पुनरपिप्राणायामऋष्यादिकरं
गन्यासानन्तरं गुह्यातिगुह्यगोप्त्री
त्वंगृहाणास्मत्कृतंजपं सिद्धिर्भव
तु मे देवि त्वत्प्रसादान्महेश्वरि ॥

इत्यनेन नैजेन मंत्रेण फलं देवीवामह
स्ते समर्प्य कवचसहस्रनामस्तोत्रादि प
ठित्वा षडंगं यनिपन्यपदतिर्णीकृत्य·
सामयिकः सहमंडलवल्लवं विधाय न
न्तसाधकाः सर्वे विनश्यन्तु विहषका
श्रवस्याभागं भवीमे स्तुयं सत्रो स्तु रुः
सत्य इत्यादि शांतिं पठित्वा ईशानेनि
र्मील्येन निर्माल्यं वामिकेन सः इति सं
स्कृत्य ततः इतः पूर्वं नागतमसश्वास
वस्था सम मनसा वाचा पाप्याः कृत्वेमणि
श्वाप्राणदेहधर्माधिकारतो यत्कृतं यल
ते तत्सर्वं मामदीयं + श्रीत्रिपुरभैरवी +चलकालं
चरणे समर्पणमस्तु गतमर्दे
इति स्वात्मानं समर्प्य स्वविसर्जिति
शिवे स्वानग्रहणाय पदैः साहिकोसा

त्रि
३७

भिः पाद्यैश्चैः नीराज्यार्चितैः कृताभि
षेकभैरवीपद्धतिर्मनाक् इति श्रीत्रि
पुरभैरवीनित्यपूजापद्धतिः ॥
ॐ अथ कवचं प्रलिख्यते श्रीपार्वत्युवा
च देवदेव महादेव सर्वशास्त्रविशा
रद कृपां कुरु जगन्नाथ धर्मज्ञोसि
महामते १ भैरवी या पुरा प्रोक्ता वि
द्या त्रिपुरपूर्विका तस्यास्तु कवचं
दिव्यं मह्यं कथय तत्त्वतः २ तस्या
स्तु वचनं श्रुत्वा जगाद जगदीश्वरः
अद्भुतं कवचं देव्याः भैरव्या दिव्यरू
पि वै ३ श्रीईश्वर उवाच कथया
मि महाविद्याकवचं सर्वदुर्लभम्

शृणुष्वैवं च विपिना क्रत्वा गोप्यं त्वया
पितन्‌ ४ यस्याप्रसादात्सकलं विभर्मि
भुवनत्रयं यस्याः सर्वसमन्वत्वं यस्या
स्याघापितिष्ठति ५ माता पिता जग
न्माता जगद्दहा स्वरूपिणी सिद्धिस
त्रीच सिद्धा च सिद्धा इष्टजं तथ ६
सर्वभूतहितकरी सर्वभूतस्वरूपिणी
ककारे पातु मां देवी कामिनी काम
दायिनी ७ एंकारे पातु मां देवी मूला
धारस्वरूपिणी ८ ईकारे पातु मां दे
वी रतिः सर्वसुखप्रदा लकारे पातु मां
देवी ईशानी वरवल्लभा ९ ह्रींकारे
पातु मां देवी सर्वत्र शंभुसुंदरी एतैर्व
र्णैर्महामाया शांभवी पातु मस्तकम्‌ १०

त्रि॰
क॰
३७

ककारीपातुमांदेवीशर्वाणीहरगेहि
नी सकारीपातुमांदेवीसर्वपापप्रणा
शिनी ११ ककारीपातुमांदेवीकामरूप
धरासदा ककारीपातुमांदेवीशंवराणि
प्रियासदा १२ लकारीपातुमांदेवीध
राधरणिरूपधृत् ह्रींकारीपातुमांदेवी
शंकरार्धशरीरिणी १३ एतैर्वर्णैर्महा
मायाकामराजप्रियावतु सकारीपातु
मांदेवीसावित्रीसर्वदायिनी १४ कका
रीपातुसर्वत्रकलास्वरस्वरूपिणी ल
कारीपातुमांदेवीलक्ष्मीसर्वसुलक्ष
णा १५ ह्रींकारीपातुसर्वत्रदेवीत्रिभु
वनेश्वरी एतैर्वर्णैर्महामायापातुश
क्तिस्वरूपिणी १६ वाग्भवंमस्तकंपा

न्तवरनंकामराजिका शान्तिस्वरूपि-
णी पातु हृदयं मंत्रसिद्धिदा १७ सुंदरी
सर्वदा पातु सुंदरी परिरक्षतु रक्तवर्णी
सदा पातु सुंदरी सर्वदायिनी १८ नाना
लंकारसंयुक्ता सुंदरी पातु सर्वदा सर्वा
ग सुंदरी पातु सर्वत्र शिवदायिनी १९
जगदाह्लादजननी शंभुरूपा च मां सदा
सर्वमंत्रमयी पातु सर्वसौभाग्यदायि
नी २० सर्वलक्ष्मीमयी देवी परमानंद
दायिनी पातु मां सर्वदा देवी नानाशब्द
निधिः शिवा २१ ततः पश्चिमनिधिर्देवी
शर्वाणी सर्वदायिनी दक्षिणामूर्त्तिर्मां
पातु ऋषिः सर्वत्र मस्तके २२ पंक्तिः छं
दः स्वरू पातु मुखे पातु सुरेश्वरी गं पातु

घात्मिका पातु हृदयं शंकरी सदा २३
त्रि॰ सर्वसंमोहिनी पातु संक्षोभिणी सदाव
क॰ तु सर्वविद्राविणी पातु सर्वाकर्षणका
६८ रिणी २४ सर्वाह्लादकरी पातु सर्वसंक्षो
भिणी सदा सर्वविद्राविणी पातु सर्वा
कर्षणकारिणी २५ क्षोभिणी सर्वदा
पातु वशिनी मां सदावतु आकर्षिणी स
दा पातु संमोहिनी सदावतु २६ रति दे
वी सदा पातु भगा मां सर्वदावतु माहेश्व
री सदा पातु कौमारी सर्वदावतु २७ सर्वा
ह्लादनकारी मां पातु सर्ववशंकरी क्षेमं
करी सदा पातु सर्वांगसुंदरी सदा २८ स
र्वांगयुवतिः पातु सर्वसौभाग्यदायिनी
वाग्देवी सर्वदा पातु वाणिनी सर्वदावतु ९

वशिनी सर्वदा पातु महासिद्धिप्रदा स
दा सर्वविघ्नविदारिणी पातु गणनायकः सदा
वतु ११ दुर्गादेवी सदा पातु वटुकः स
र्वदावतु क्षेत्रपालः सदा पातु पातु
माधारशक्तिका १२ अनंतः सर्वदा पा
तु वराहः सर्वदावतु पृथिवी सर्वदा
पातु स्वर्णसिंहासनं तथा १३ रक्ताम्बु
तं च सततं पातु मां सर्वकालतः सुधा
र्णवः सदा पातु कल्पवृक्षः सदावतु १४
श्वेतच्छत्रं सदा पातु रत्नदीपः सदावतु
नंदनोद्यानं सततं पातु मां सर्वसिद्धये १५
दिक्पालाः सर्वदा पातु इंद्राद्याः सक
लास्तथा वाहनानि सदा पातु अस्त्रा
णि पातु सर्वदा १६ शास्त्राणि सर्वदा

त्रि॰
स॰
३५

पातु योगिन्यः पातु सर्वदा सिद्धाः
पातु सदा देवी सर्वसिद्धिप्रदा च तु २६
सर्वांगसुंदरी देवी सर्वज्ञ सर्वदा च तु
आनंदरूपिणी देवी चित्स्वरूपा चि
दात्मिका २७ सर्वत्र सुंदरी पातु सुं
दरी भवसुंदरी पृथग्देवालये घोरे
संकटे दुर्गमे गिरौ २८ अरण्ये प्रांतरे
वापि पातु मां सुंदरी शिवा इदं कव
चमित्युक्तं मंत्रोद्धारश्च पार्वति २९
यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः
शुचिः तस्य सर्वार्थसिद्धिः स्याद्यद्य
न्मनसि वर्तते ३० गोरोचनाकुंकु
मेन रक्तचंदनकेन वा स्वयंभूः कु
सुमैः शुक्लै र्भूर्जपत्रे शुभे स्मरे ३१

श्मशाने प्रान्तरे वापि शून्यागारे शि
वालये सप्तशङ्खार्गलहरणायंत्रं पूज-
यित्वा कुमारिकाः ४२ तन्मंत्रं पूज
यित्वा च गुरुपंक्तिं विशेषतः पूज-
यित्वा यथाशक्त्या स्तुत्वा च विधि
मुना ४३ धारयेत् हरणायंत्रं पूजयि
त्वा कुमारिकाः तथा नैव पूजयित्वा
च गुरुपंक्तिं तथैव च ४४ देव्यै बलिं
निवेद्याथ वनं मार्जारसूकरैः नकु
लैर्महिषैर्मेषैः पूजयित्वा विधानतः ४५
धृत्वा सुवर्णमध्यस्थं कंठे वा मस्तके भु
जे सन्निधौ शुभनक्षत्रे सूर्यस्योपरय
नेनवा ४६ धारयित्वा कवचं सर्व
सिद्धिं लभेन्नरः कवचस्यैव माहात्म्यं

त्रि॰
क॰
८॰
40

नाहं वर्षशतैरपि ४७ शक्नोमि नम
हेशानि वक्तुं तस्य फलं वचन् नाग्नि
चौरभयं तस्य न तत्र व्याधिपीडनम्
नत्रभितूभयं तत्र न चापि पीडनं भ
वेत् विघ्नप्रशमनं सर्वं सर्वव्याधिवि
नाशनम् ४८ सर्वरत्नाकरं जैत्रं स
र्ववर्गफलप्रदम् यत्र तत्र न वक्तव्यं
न दातव्यं कदाचन ४९ मंत्रप्राप्य
विधानेन पूजयेत्सततं सुधीः तत्रा
पि दुर्लभं मन्ये कवचं देवरूपिणि ५०
गुरोः प्रसादमासाद्य विद्यां प्राप्य सु
गोपिताम् तत्रापि कवचं दिव्यं दुर्ल
भं भुवनत्रये ५१ श्लोकं वा स्तवमेनं
वा यः पठेत्प्रयतः शुचिः तस्य सर्वा

थेष्टसिद्धिः स्याच्छंकरेणच भाषितं १६
गुरुदैवो हरः साक्षात्पत्नी तस्य च
पार्वती अभेदेन यजेद्यस्तु तस्य सि
द्धिरदूरतः ५७ इति श्रीविश्वसार
तंत्रे श्रीत्रिपुरभैरवीकवचं समाप्तं

ॐ अथ सहस्रनामं ॐ अथ वक्ष्ये
महेशानि देव्या नाम सहस्रकं
यत्प्रसादान्महेशानि सर्ववर्गफलं
लभेत् सर्वरोगप्रशमनं सर्वमृत्यु
विनाशनं सर्वशांतिकरं स्तोत्रं शं
करेणाच भाषितं नातःपरतरं स्तोत्रं
नातःपरतरं तपः नातःपरतरो वि
द्यातीर्थं नातःपरःपरं यस्मात्सर्वमय

त्रि॰ स॰ ८१

न्यग्नैयस्यामध्यापि तिष्ठति लयमे
ध्यंतितत्सर्वं लयकाले महेश्वरी ॥
अस्य श्री त्रिपुरभैरवी सहस्रनाम
स्तोत्रमंत्रस्य भगवान् शिवऋषिः
पंक्तिः छंदः आद्याशक्तिः भग
वती त्रिपुरभैरवी देवता धर्मार्थका
ममोक्षार्थे विनियोगः ॐ त्रिपुराप
रमेशानी सर्वसिद्धिनिवासिनी स
र्वमंत्रमयी देवी सर्वशक्ति समन्वितः
सर्वधारमयी देवी सर्वसंपत्प्रदा शुभा
योगिनी योगमाता च योगसिद्धिनिव
र्तिनी योगिध्येया योगिमाता योग
भोगविलासिनी लीलाहेलानया
क्रीड कालरूपप्रवर्तिनी कालरू

यः कालरात्रिः काली कमलवासि
नी कमला कांतिरूपा च कामराजे
श्वरी क्रिया ऊहः कपटवेशा च क
पटा कपटाकृतिः ऊरुदा चर्चिता
कीर्ना कालरात्रिः क्रियास्पदः घो
रा चाघोररूपा घोरगा च घूर्णा पहा
घर्घरा घोरिणी घूर्णी घोरनादप्रिया
मदा घोराकारा घोरनरा च घर्माघूर्म
प्रदा रतिः घंटा घर्घरनादा च घंटा
नादप्रियामदा सूक्ष्मा सूक्ष्मतनया
स्थूला स्वनिः सूक्ष्मा महामतिः दमा
भामानया भीमा भीमनादप्रवर्त्ति
नी प्रर्पेद्रूपा भयहरा भयपदा भयना
शिनी श्मशानवासिनी देवी श्मशा

त्रि॰ नालयवासिनी शवासनाशववहा
स॰ शवदेहा शवासवा शवहारा कंठदे
४८ शेशवकंकणधारिणी दंतवासद
नीसत्या सत्यासकेशपाशिनी स
त्यदेहासत्यहरासत्यवादविलासिनी
सत्यालया सत्यसंगा सत्यास त्य वि
हारिणी असंगावसंगावसत्संगा
संगमोहिनी मायामतिर्महाविद्या
महामद्यविलासिनी मद्यहारामद्य
पानामद्यनिंदकनाशिनी गत्नकुपि
रमालावस्त्रकिढयनिवासिनी महा
मद्यमदामत्ताकामांसपाशात्तमांसगा
मांसाहारामांसधरा मांसशी मांसभक्ष
णा रक्तमानारक्तरुवी रक्ताम्यारक्त

लोचना रक्ताहारा रक्तप्रियारक्तनिं
दकनाशिनी रक्तभागीरक्तरुचीर
क्तदेहा स्वरक्तका स्वयंभूॐनम स्वाहा
स्वयंभूॐनमोऽस्तुका स्वयंभूॐडमाहा
रा स्वयंभूनिंदकाघ्नाका स्वयंभूपुष्प
संप्रीना स्वयंभूनिंदकांतका ॐङ्गो
लविलासा च ॐङ्गसदारतिः ॐङ्गोल गोल
प्रियकरी ॐङ्गोलमग्नवा शुक्रात्मि
काशुक्रकरा सशुक्राचैव शुक्रिणी
शुक्रपूजनपूज्या च शुक्रनिंदकनिं
का रक्तमाल्यारक्तपुष्पा रक्तपुष्पक
पुष्पिका रक्तचंदनसिक्तांगीरक्तचंद
नवंदका मत्स्यामत्स्यप्रियामत्स्यम
त्स्यभक्ष्यामहोदया मत्स्यकामामां

त्रि॰ स॰ ५२

स्महारामन्स्मनिंरकनाशिनी केक
ग्दीनतथाक्रूराक्रूरसत्वविनाशिनी
क्रूरांमाकुलिशांगीचवज्रांगीवज्र
संभवा वज्रदेहावज्रहरावज्रकंक
लहारिणी निम्ननाभिर्भीनिहराभ
यदाभयहारिणी भयप्रदाभयभी
माग्रभीमाभीमनादिनी सुंदरीशो
भनासत्याहेमाहेमंकरीतथा सिं
हासिंनसीमंनासिंहूरमहश्या कलिं:
मक्कारं जिननासावसनाहास्त्रिय
नासिका ल्वर्वालंवोदरीदीर्घादी
र्घघोणमहत्कचा कुटिलावर्त्तिका
चंडी चंडनादातिचंडिका अतिचंडा
महाचंडाप्रचंडाचंडवेगिनी चंडाली

चंडिकाचंडशत्रूपमहाबला चंपा
चंपावतीचोद्दानोल्लणानील्लणप्रिया
कृतिः जलदाजयदायोगाजगदानं
दकारिणी जगद्वंद्याजगन्माताजग
तीजगतः क्षमा जयाजयाजयित्रीव
जयदाजयिनीतथा जननीचजगद्धा
त्रीजयाख्याजयरूपिणी जगन्मान्या
जगन्माताजयश्रीर्जयकारिणी
जयिनीजयमाताचजयाचविजयांज
ना खंगीनिखंगरूपाचसुखंगाखंगपा
रिणी खंगरूपाखंगकराखंगांगीखंग
वल्लभा खंगदाखंगमायाचखंगिनी
खंगमंडली शंखिनीचापिनीदेवी
वज्रिणीमुसलीमतिः वाणिनीभिं

त्रि॰ सु॰ ४४ 55

ष्टिपालीचपाशीचैवांकुशीखरी ध
नुर्धारीटंकिनीचर्मीकुंतीचकार्णनासि
का मञ्जरीहलहस्ता च हलीरणनिवा
सिनी हलालया हलहस्ता हलसंभ
वद्रूपिणी हलखेलान्तलखेला च तूलं
गीतूलवल्लभा नानास्त्रधारिणी दे
वी नानाशस्त्रसमुद्भवा लक्ष्यालक्ष्यह
रा लब्धास्त्रलाभालाभद्रूपिणी ध
निनीधनदाधन्याधन्यरूपधराधङ्क
धन्विनीधनुःशास्त्रा च धनुर्मानी धरी ध
रा धीरशास्त्रा धनाना मान्या धन्यांगी ध
नवासिनी धर्मदा धनलाभा च धन
लभ्या महाधनुः अशांता शांतरूपा
चव्यासमार्गनिवासिनी गगनागण

सेव्या च गणानां च गणवल्लभा गणदारा
गणेशा गणपा गणमाता मननंदिनी गम्या
च गमना शापवादहा नादवर्धिनी प्रि
यहा प्रियभव्या च प्रियाप्रेमा प्रियात
नुः प्रियदा प्रियभाव्या च प्रियसंभव
नेश्विता स्थिरा स्थिररूपा च स्थिरदा
स्थैर्यवर्धिनी चंचला चपला चाला च
पलांग निवासिनी गौरीकालीतथा
क्लिन्नामायाधाम्या ललितप्रभा सुंदरी
त्रिपुरा भव्या त्रिपुरी चरवासिनी त्रिपु
रात्रासनी देवी त्रिपुरप्राणनाशिनी भै
भैरवी भैरवप्राच भैरवस्त्रिप्रातनुः
भैरवांगी भयकरी भैरवीप्रियवल्ल
भा कालदा कालरात्रिश्च भद्रका

न्यायनी क्रिया क्रयदा क्रयहा क्रेया क्र
यप्राणप्रियानघा क्लींकारी कमलाल
त्रि॰ क्ष्मीः शक्तिः स्वाहा विभुः प्रभुः प्रकृ
स॰ तिः पुरुषश्चैव पुंनारी पुरुषाकृतिः
१८ पुरुषांगी पूरुषी च नया प्रकृतिनृपभृ
त् परमः पुरुषश्चैव मायानारायणी
मतिः ब्राह्मी माहेश्वरी चैव कौमारी चैव
वैष्णवी तथा वाराही चैव चामुंडा रुद्राणी
हरवल्लभा कौवेरी शांभवी क्लस्ला का
त्यायनी च पूजना राक्षिसी डाकि
नी विद्या विविद्या विक्रमानया हं
सिनी राकिनी नीलगंगा पवींगं पवा
हना केकरी कोटराक्षी च निर्मीषा

त्वमंसिका ललजिह्वासुजिह्वाच्चवद
नावनदायिनी चंद्राचंद्रप्रभाचांद्रीचं
द्रकांतिष्ठुनत्परा ग्रमृतापादना पूषा
न्नष्टिः पुष्टीरतिर्धृतिः शशिनीचंद्रि
काकांतिर्ज्योत्स्नाश्रीःप्रीतिरंगदा
पूर्णापूर्णामृताकल्पलतिकाकल्प
दानहस्ता स्वाकल्पाकल्पहस्ताचकल्प
क्षयकरीतनुः कल्पाख्याकल्पभव्या
चकल्पक्षयकरीतनुः कल्पाख्याक
ल्पभव्याचकल्पवंदकवंदका शवि
शवीप्रेतशवीउल्काशवीमहाशवी
सशवश्रृगालूकवदनाकाकास्याविक
टानना कुकिलास्याचसर्पास्याकुट
लीश्वरभानना नानाशवीनानाहू

त्रि॰ पधारिणीधरणीधरा विश्वबंधा विश्व
स॰ माता विश्वाख्या विश्वभाविनी सूर्यात्म
७६ र्यप्रजाशोभा सूर्यमंडलसंस्थिता सू
46 र्यकांतिः सूर्यकला सूर्याख्या सूर्यभा
विनी तपिनी तापिनी धूम्रा मरीचिर्ज्वा
लिनी रुचिः सुषुम्ना भोगदा विश्वबो
धिनी धारिणी क्षमा युगदा युगह्वाया यो
ग्या योगप्रदा योगप्रवर्धिनी वह्निमंडल
संस्थाच वह्निमंडलसम्यका वह्निप्रिया
वह्निवर्णा वह्निसाहारस्मरज्ञिका वह्निते
जा वह्निरागा वह्निदा वह्निनाशिनी व
ह्निप्रिया वह्निकला वह्नेशा वह्निस्थिता
सदा धूम्रार्चिर्द्रूपा ज्वलिनी ज्वालिनी
विस्फुलिंगिनी स्वः स्त्री स्वरूपा कपि

लाहव्यकव्यवहा तथा नानातेजःऽ
ह्रीदेवी परंब्रह्मकुटुंबिनी ज्योतिर्ब्र
ह्ममयी देवी परंब्रह्मस्वरूपिणी पर
मात्मा परा पुण्या पुण्यपदा पुण्यवर्धि
नी पुण्याहा पुण्यनाम्नी च पुण्यबंधु
प्रियातनुः पुण्यनाम्नी पुण्यमाल्या पु
रुषांगविवर्धिनी पुण्यदेहा पुण्यक
री पुण्यनिंदकनिंदका पुण्यकाल
हरा पुण्यपास्त्र पुण्या पुण्यमालिका
पुण्यशीला पुण्यकीलिः पुण्यनाम
स्समापरा पुण्यसेवा पुण्यस्वरूपा पुण्य
ण्यपुरवल्लभा पुरुषा पुरुषप्राप्राण
पुरुषात्मस्वरूपिणी पुरुषांगी पुरु
षा च पुरुषस्य प्रियातनुः स्त्रपुष्पापु

त्रि॰
सू॰
५७

47

भक्तप्राणाऽभयहाऽभयवल्लभा ऽभयप्रिया
ऽभयहाराऽभयानंदकानंदका ऽभयाह्लाऽ
भयमालालाह्लोऽभयानिंदकनाशिनी अन
घविघ्नप्रणाशा चमतामानिलघातघ्ना न
तन्त्रप्राणारुद्रीयमहाशंखनिवासिनी
महाशंखेश्वरीमाणामानस्वरूथामहाद
री लंबोदरी चलंबोष्ठी लंबनिम्नतनूद
री बिंबोष्ठा लंबनासा च लंबघोणा स
लंबका प्रतिलंबा महालंबा प्रलंबाले
बबाहिनी लंबहा लंबपार्श्वा लंब
स्यालंबपूजिका निर्लंबा च स्थूलंबा च
महालंबा चडर्गमा घंटघंटा महाघं
टा घंटनादप्रिया सदा वाद्यप्रिया वा
द्यरता सवाद्यानादनाशिनी रमता मा

सुरामा च रमणीयस्वभाविनी सुवर्णा
वर्णपदारंभा रंभोरू रामवल्लभा रामप्रि
या रामकरीभा मांगी रमणी रतिः रतिप्रि
या रतिमती रतिसेव्या प्रियारतिः सुरतिः
उरतिः शोभा सुशोभा शुभनाशिनी सु
शोभा च महाशोभा अतिशोभा सुशोभ
ना लोभनीया महालोभा सुलोभा लो
भवर्धका लोभांगी लोभतुष्टा च लोभि
नी लोभनाशका लोभप्रिया महालो
भा लोभनिर्हका निर्हका लोभांगवासि
नी गंधा विगंधा गंधनाशिनी गंधा
ढ्या गंधपुष्पा च सुगंधा प्रेमगंधिका दु
र्गंधा प्रतिगंध्या च सुगंधा निर्गंधिका
महागंधा सुगंधा ह्रींगंधनाशकना

त्रि॰
स॰
४८

शिनी पद्मापद्मावतीप्रेमापद्मगंध
सुगंधिका पद्मालयापद्मकरापद्मवा
हनवाहना पद्मस्थापद्मवक्त्राचपद्म
क्रीडासुवल्लिका पद्मानकापद्मवहा
पद्मप्रासादशंकरी पद्मनिदकनिद्रा
चपद्मसंतोषवाहना रक्तोत्पलधरा
देवी रक्तोत्पलप्रियासदा रक्तोत्प
लसुगंधा च रक्तोत्पलनिवासिनी
रक्तोत्पलगृहागमा रक्तोत्पलमनो
हरा सरक्तोत्पलनेत्राचसर्वरक्तोत्प
लनूपुरा नारीनारायणीशानाना
रायणगृहप्रिया। नारायणस्वदेह॰
स्थानारायणमनोहरा नारायणस्व
देहस्थानारायणनमस्कृता नाराय

णंगसंभूता नारायणप्रियानन्दः वैस
वीविस्नुपूज्या च वैस्नवीसंस्थिता नन्दः
हरपूज्या हर श्रेष्ठा हरस्प वल्लभा हृदया
संहारे हरदे हस्था हर पूजनतत्परा
हरदेहसमुद्भूता हरांगवासिनी दक्रः
हरपूजक पूज्या च हरनंदनतत्परा
हरैदेहसमारूढा हर क्रीडासदारति :
सृसंसर्गसंगरहिता असंसर्गसंगनाशिनी
निर्जना विजया दुर्गा दुर्गदेहविवर्धि
नी दुर्गस्था दुर्गरूपा च दुर्गदेहविव
र्धिनी दुर्गदेहान्तका दुर्गरूपिणी दु
र्गनाशिनी प्रेतप्रिया प्रेतनकरा प्रेतदे
हसमुद्भवा प्रेतांगवासिनी प्रेता प्रेत
देहविमर्दका डाकिनीयोगिनी दे

त्रि॰
स॰
७८

वीकालरात्रिप्रियासदा कालरात्रिहरा
कालाकुलदेहामहानना: कुलांगीकु
लिशांगीववज्रांगीवज्ररूपधृक् नाना
देहधराधन्याषट्चक्रक्रमवासिनी
मूलाधारनिवासाचमूलाधारस्थिता
सदा वायुरूपामहामायावायुमार्गनि
वासिनी वायुयुक्तावायुकरावायुपू
रकपूरका: वायुरूपधरादेवीसुषुम्
णामार्गगामिनी देहस्थादेहरूपाच
देहध्येयासदेहका नाडीरूपाचनाडी
स्थानवीननलिनानना इडाचपिंग॰
लावैवसुषुम्नाचसरस्वती सदाशिव
प्रियकरीमूलप्रकृतिरूपधृक् ब्रह्म
नेश्वीमहेशानीशृंगाटांगानिवासिनी

उत्पत्तिस्थितिसंहर्त्री प्रलयपापदवासि
नी महाप्रलयपुञ्जावह्निसंहार
कारिणी स्वधास्वाहा हव्यवहा हव्या
हव्यप्रिया सदा हव्यस्था हव्यभक्षा
च हव्यदेहसमुद्भवा हव्यक्रीडका
मधेनुस्वरूपा रूपसंभवा सुरभिर्नन्दि
नीपुण्या यज्ञांगी यज्ञवल्लभा यज्ञेश्व
यज्ञदेहा च योगिनी योनिवाहिनी
अयोनिजा सती सत्या असती कुल
टा तनुः अहल्या गौतमी गम्या विदे
हा देहनाशिनी गांधारी द्रौपदी दू
ती शिवाहूती शिवा प्रिया त्रिपुरेश्वरी
पंचदशी पौर्णमासी चतुर्दशी पंचमी
च नयाषष्ठी नवमी वाष्टमी नव्या एक

त्रि॰ रशीदारशीवबाणरूपा भयप्रदा सं
स॰ क्रान्तिमांसरूपा वक्रान्तरूपाक्रान्तत्रिया
५॰ परमात्मादिरूपा वचाटिकादंडरूपपु
50 त्र यमरूपा महाकाली संध्या सुसंग
नाशिनी त्रिपा मायामरूपा वयम
कंन्यायमीयमा मानंगी कुलरूपा व
कुलीना कुलनाशिनी कुलकांनाकु
शाकुंभाकुंभदेहविवर्धका नारीनाकु
लसुंदावसवेणाग्रहणाग्रभा नदीसाग
रगा शांतिः शांतिरूपा सशांतिका
श्वाश्वातस्सास्पादोभादोभरूपनि
वासिनी नदीशारहशांति स्वस्कृतिः
स्सनिर्धनामही दिवारात्रिः पंचभूतदे
हाचैवसदेहका कुरुकुल्मा द्विजम

स्नानागयज्ञोपवीतिनी वर्णिनी
डाकिनी शाकिनी शान्तिः ॐह्रंऊल्का सकृ
लिका अपराजिता च प्रत्यगीर
जिताजयनाशनी जयाचविज
याचैव महिषासुरघातिनी मधु
कैटभहन्त्री चंडमुंड विनाशिनी
निसुंभसुंभहननी रक्तबीजक्षयं
करी काशी काशीनिवासा च म
धुरा पार्वती परा अपर्णा चंडिका
देवी मृडानी अंबिका कला शुक्ला
क्रूरा रक्तवर्णा शारदेंदुकलाकृ
तिः रुक्मिणी राधिका चैव कौर
मोर वी व्याः परिकीर्तिता १००० अंष्टा
धिकसहस्रं तु देव्या नामानुकीर्त

त्रि॰ स॰ ५१ नं महापातककोटिघ्नं तथैव चोप
पातकं गलेष्वनेन स्तोत्रेण सर्वं न
श्यति तत्क्षणात् सर्वं वा श्लोकमे
51 कं वा प्रपठन्वा स्मरन्नपि पठेद्वा
पाठयेद्वापि सद्यो मुच्येत बंधनात्
राजद्वारे भये दुर्गे संकटे गिरिदुर्गमे
प्रान्तरे पर्वते चैव नौकायां वा महे
श्वरि वह्निदुर्गे भये प्राप्ते सिंहव्याघ्र
भयाकुले प्रपठन्वा स्मरन्मर्त्यः स
र्वसंकटनाशनः अपुत्रो लभते पुत्रं
दरिद्रो धनमाप्नुयात् सर्वशास्त्रप
रो विप्रः सर्वयज्ञफलं लभेत् वादी
मूको भवेच्छत्रु राजा वा सेवकायते
गोरोचनाकुंकुमेन लिखित्वा स्तोत्रम

नन्यधीः गुरुणांवैसर्ववेवीपिसर्वसि
द्धिफलंलभेत् एवंवासवर्णामध्यस्थंस
र्वकामंननोलभेत् स्त्रियावामभुजेधा
र्यंपुंसांवामकरेनथा आरितमंगल
दिनेगुरोवापिमहेश्वरि शनैश्चरदिने
वापिसर्वसिद्धिफलंलभेत् प्रानरेवा
शमध्याहनेवानिशायामथवाननके सूर्य
वासरेहेवापिलिखियन्त्रेनदेशिकः
रजस्वलाभगंदष्टानन्नस्यलिखि
नस्य स्वयंभूःकुसुमैः शुक्लैः सुगंधिगं
धचंदनैः मृगनाभिरसान्तैश्चलिखि
त्वायत्नपूर्वकं लिखित्वावैनमामन्त्रं
निःधनैश्चर्यमनन्यधीः कुमार्यःपूज
यित्वावनार्यश्चैवविशेषतः पूजयि

त्रि॰
स॰
५८
52

नाम्नऋक्षसमैर्धूपचंदनवस्त्रकैः सिंदूरेर
ऋक्षसमैः पूजयेद्भक्तियोगतः अपदे
वः ऋमार्यावाद्दशम्यांतु प्रपूजयेत्
सर्वाभीष्टफलं सोपि लभतेनन्त्रणा
दपि नात्रसिद्धाद्यपेक्षास्ति नवाभि
त्रारिहूषणं नवाप्रयासवाऋलंका
यक्लेशकरंतथा सर्वदासर्वकाले
षुषट्सहस्त्रप्रमाणात्तः बलिंदद्यादि
तानेनप्रत्यहं पूजयेद्भिवास्त्र स्वयंभू
ऋक्षमैः श्लोकैर्वलिंदद्याद्दिवानिशम्
पूजयेत्त्यार्वतीदेवींभैरवींत्रिपुरांवि
नाम्न ब्राह्मणान्भोजयेन्नित्यं दशकं
द्वादशंतथा मासमेकंपटेयस्तुविधिं
पंविपिनामन्ना अपुत्रोलभतेपुत्रम

पन्नो पन वा भवेत् मासद्वयेन विधि
नानथा मासत्रयेन च कृतीर्ज्यम वा
प्नोति तथा मासचतुष्टये दीर्घरोगा
त्प्रमुच्यते मंत्रमेक विराड्भवेत् सर्वैश्च
र्यैलभे हीनो मासषट्केन थैव च सप्तमे
खेचरत्वं च अष्टमे वाक्पतिर्भवेत् न
वमे सर्वसिद्धिश्च दशमे लोकपूजितः
एकादशे राजवश्यो द्वादशे भूपुरंदरः
वारमेकं पठेद्यस्तु स पूज्या फलमाप्नु
यात् सप्तवारा श्लोकमेकं वा यः पठे
त्प्रयतः शुचिः स पूजा फलमाप्नो
ति भैरवेण च भाषितं चातुष्काल्यीति
योगेश्वराली रोग्यविशोधनः सो भाग्य
सिद्धियोगेश्वरा शोभनं च महेश्वरि पंच

त्रि॰ स॰ ५१

53

म्यां वा न व्याख्यातं यत्र ऊर्ध्वापि निर्दिष्टानि
तत्र शंका न विधेयेन नवमात्रादिरूप
णं किमन्यद्बहुना देवि सर्वाभीष्टफ
लं लभेत् ॥ इति श्री विश्वसारे तंत्रे श्री
त्रिपुरभैरवीसहस्रनामस्तोत्रं संपूर्णं
शुभम् ॥
ॐ अथ स्तोत्रराजं ॐ ब्रह्मादयः स्तुतिश
तैरपि सूक्ष्मरूपां जानंति नैव जगदा
दिमनादिमूर्त्तिम् तस्माद्वयं कुचनतां
नवकुंकुमाभां स्थूलां स्तुमः सकलवा
ङ्मयमात्ररूपाम् १ सद्यः समुद्य
तसहस्रदिवाकराभां विद्याक्षसूत्र
वरदाभयचिह्नहस्ताम् नेत्रोत्पलैस्त्रि
भिरलंकृतवक्त्रपद्मां त्वां हारभारसु

विरां त्रिपुरे भजामः ४ सिंदूरपूररुचि
रं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफ
लैकगम्याम् अन्योन्यभेदकलहाकु
लमानभेदैर्जानंति किं जडधियस्तव रू
पमम्ब ५ स्थूलां वदंति मुनयः श्रुतयो
योगण्यां निरूपणां वदंति वचसामपि
वासमन्ये त्वां मूलमाहुरपरे जगतां भ
वानि मन्यामहे वयमपारकृपांबुराशि
मू ६ चंद्रावतंसकलितां शरदिंदुशुभ्रां
पंचाशदक्षरमयीं हृदि भावयंति त्वां पु
स्तकं जपवटीममृतान्यकुंभं व्याख्यां च
हस्तकमलैर्दधतीं त्रिनेत्राम् ७ शंभुत्व
मद्रितनयाकलितार्धभागो विष्णुत्वम
वकमलापरिनद्धदेहः पद्मोद्भवत्वम

त्रि॰ स्तो॰ ५८

54

सिवागपितासभूमिलेखाक्रियास्वज
गन्तित्रिपुरेत्वमेव ६ आश्रित्य वाग्भवभ
वंस्वतन्त्रः परादीन्भावान्पदेषु विहिता
न्समुदारयन्तीम् कर्णादिभिस्वकरणैः
परदेवतांत्वांसंविन्मयींहृदि कदापि
न विस्मरामि ७ आक्रं म्यवाग्रमभि
जित्य च वैरिवद्रुमालोकानिस्वलदि
या निजनासिकाग्रम् ध्यायंनिमूः
र्ध्निकलितेन्दुकलावतंसंसत्वद्रूपमंबवह्न
जिनस्तृणार्कमित्रम् ८ त्वाप्राप्य
मन्मथरिपोर्वपुरर्धभागंसृष्टिंकरो
षि जगतामिति वेदवादः सत्यंतदं
द्रितनये जगदेकमातर्नोचेदशेषज
गतः स्थितिरेव न स्यात् ९ पूजां वि

पायकृत्यमैः स्वरपादपानांपीठेनवां
वकनकावलकंदरेषु गायंति सिद्धव
नितं सह किन्नरीभिरारुह्यादितासवर
स्यारुणनेत्रपद्माः १० विद्युद्विलास
वपुषः श्रियमावहंतीं यांतीं स्ववासभ
वनाच्छिवराजधानीम् सौंदर्यमार्ग
कमलानि विकासयंतीं देवीं भजेत
परमामृतसिक्तगात्रीम् ११ आजन्म
जन्मभवनं भवनं दृशीनां वैतन्यमा
त्रतनुमंबनवाश्रयामि त्रैलिशाविम
भिरूपासितपादपद्मां सौभाग्यजन्म
वसतिं त्रिपुरे यथावत् १२ आहार्य
भाविभुवनेस्वजनैंड्रुपायानहिभा
तिपुनरर्कनतनःसशशांकास्बहुलाम्नि

त्रिभै
स्तो
११
55

काहरनितत्सकलंयुगांतेनंशारदं
मनस्विजातनविस्मरामि २६ नाराय
णीतिनरकार्णवतारिणीतिगौरीति
खेदशमनीतिसरस्वतीति ज्ञानप्रदे
तिनयनत्रयभूषितेति त्वामद्रिराजतन
येविवृणामवंति २७ येस्तुवंतिजगन्मा
तस्त्वांश्लोकैर्द्वादशभिःक्रमात त्वामनु
प्राप्यवाक्सिद्धिं प्राप्नुयुस्तेपरांश्रियम्
इतिश्रीत्रिपुरभैरवीपंचमांगस्तोत्रंसं
पूर्णंशुभमस्तु ॥ भद्रम्

त्रिपुरभैरवी
पं॰
स्तो[illegible]॥